श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीकृष्णब्रह्मतन्त्रपरकालमहादेशिकैरनुगृहीतं

# ॥ श्री लक्ष्मीहयवदनपञ्चरत्नम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री लक्ष्मीहयवदनपञ्चरत्नम् ॥

ज्ञानानन्दामलात्मा कलिकलुषमहा तूलवातूलनामा
सीमातीतात्मभूमा मम हयवदना देवता धावितारिः।
याता श्वेताब्जमध्यं प्रविमलकमल स्रग्धरा दुग्धराशिः
स्मेरा सा राजराजप्रभृति नुतिपदं सम्पदं संविधत्ताम् ॥ 1 ॥

तारा ताराधिनाथस्फटिकमणिसुधा हीरहाराभिरामा
रामा रत्नाब्धिकन्याकुचलिकुच परीरम्भसंरम्भधन्या।
मान्याऽनन्यार्हदास्यप्रणतततति परित्राणसत्रात्तदीक्षा
दक्षा साक्षात्कृतैषा सपदि हयमुखो देवता साऽवतान्नः ॥ 2 ॥

अन्तर्ध्वान्तस्य कल्यं निगमहृदसुर ध्वंसनैकान्तकल्यम्
कल्याणानां गुणानां जलधिमभिनमद् बान्धवं सैन्धवास्यम्।
शुभ्रांशु भ्राजमानं दधतमरिदरौ पुस्तकं हस्तकञ्जैः
भद्रां व्याख्यानमुद्रामपि हृदि शरणं याम्युदारं सदारम् ॥ 3 ॥

वन्दे तं देवमाद्यं नमदमरमहा रत्नकोटीरकोटी -
वाटीनिर्यत्ननिर्यद्घृणिगण मसृणीभूतपादांशुजातम्।
श्रीमद्रामानुजार्यश्रुतिशिखरगुरु ब्रह्मतन्त्रस्वतन्त्रैः
पूज्यं प्राज्यं सभाज्यं कलिरिपुगुरुभिः शश्वदश्वोत्तमाङ्गम् ॥ 4 ॥

विद्या हृद्याऽनवद्या यदनघ करुणासारसारप्रसारात्
धीराधाराधरायामजनि जनिमतां तापनिर्वापयित्री।

श्रीकृष्णब्रह्मतन्त्रादिमपदकलिजित् संयमीन्द्रार्चितं तत्
श्रीमद्धामातिभूम प्रथयतु कुशलं श्रीहयग्रीवनाम ॥ 5 ॥

॥ इति श्री लक्ष्मीहयवदनपञ्चरत्नं समाप्तम् ॥